संस्कृतवार्ताः

14.03.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमंत्री नरेंद्र-मोदी अद्य नवदिल्ल्याः जवाहरलाल-नेहरू-स्टेडियम इत्यत्र प्रधानमन्त्री-स्वनिधि-लाभार्थिनः संबोधयति ।

· प्रधानमंत्री नरेन्द्रमोदी अद्य सायं भूटानस्य प्रधानमन्त्रिणा दाशो-शेरिंग-टोबगे इत्यनेन सह द्विपक्षीय-सम्वादं करिष्यति ।

· सूचना-प्रसारण-मंत्रालयेन अश्लील-सामग्र्याः प्रसारं विरुध्य अष्टादश- ओटीटी-प्रसार-प्रणाल्यः निषेधिताः ।

· रामनाथकोविन्दस्य नेतृत्वभूतसमित्या अद्य नवदिल्ल्यां द्रौपदी-मुर्मू-वर्यायै <u>एकं राष्ट्रं-एकं निर्वाचनम्</u> इत्यस्मिन् विषये स्वकीयं सूचनाप्रपत्रम् सम्प्रदत्तम् ।

· केन्द्रीयगृहमन्त्री अमितशाहः प्रोक्तवान च नगरिकता-संशोधन-अधिनियमेन कस्यापि नागरिकता नाधिग्रहीष्यते ।

· इंग्लैंड-ओपन-बैडमिंटन-प्रतिस्पर्धायां भारतीय-बैडमिण्टन-क्रीडिका पीवी-सिंधु अद्य बर्मिंघमस्य यूटिलिटा-एरेना इत्यत्र दक्षिण-कोरियायाः एन-से-यंग इत्यनया पराजिता सञ्जाता ।

<u>प्रधानमन्त्री-दिल्ली</u>

प्रधानमंत्री नरेंद्र-मोदी अद्य नवदिल्ल्याः जवाहरलाल-नेहरू-स्टेडियम इत्यत्र प्रधानमन्त्री-स्वनिधि-लाभार्थिनः संबोधयति । कार्यक्रमावधौ प्रधानमंत्री एकलक्ष-विक्रेतृभ्यः अस्याः योजनायाः अन्तर्गतं ऋणं वितरितवान् येषु नवदिल्ल्याः पञ्चसहस्र-विक्रेतारः सम्मिलिताः सन्ति । श्रीमोदी दिल्ली-मेट्रो इत्यस्य चतुर्थचरणस्य द्वयतिरिक्त-यात्रामार्गयोः आधारशिलाम् अपि संस्थापितवान् । एतेषु यात्रामार्गेषु लाजपत-नगरतः साकेत-जी-ब्लॉक-पर्यन्तं , इंद्रलोकतः इंद्रप्रस्थ-पर्यन्तं मैट्रो-यात्रामार्गे सम्मिलिते स्तः ये विंशति-किलोमीटरपरिमिततोः अपि अधिकं भविष्यतः ।

भूटान पीएम - भारत::

भूटानस्य प्रधान-मंत्री दाशो-शेरिंग-टोबगे भारतस्य पञ्चदिवसीय-यात्रायाम् अद्य नवदिल्लीं सम्प्राप्तवान् । अस्मिन् वर्षस्य जनवरीमासे पदभारमसङ्कुर्वतः तस्य इयं प्रथमाविदेश-यात्रा अस्ति। नवदिल्ल्याः विमानपत्तने केंद्रीय-मंत्री अश्विनी-कुमार-चौबे तस्य आतिथ्यसत्कारम् अकरोत् । विदेश-मंत्रालयः प्रोक्तवान् यत् यात्रावधौ भूटानस्य प्रधानमन्त्री राष्ट्रपतिना द्रौपदीमुर्मुवर्यया सह मेलनं विधास्यति अपि च प्रधानमन्त्रिणा नरेन्द्रमोदिना सह द्वपक्षीयवार्ताम् अपि विधास्यति । प्रधानमंत्री शेरिंग-टोबगे अपि मुम्बय्यीं यास्यति । विदेशमन्त्री , विदेश-व्यापार-मंत्री, ऊर्जा-प्राकृतिक-संसाधन-मंत्री, उद्योग-वाणिज्य-रोजगार-मंत्रिणः , भूटान-सर्वकारस्य वरिष्ठाधिकारिणः च प्रधान-मंत्री दाशो-शेरिंग-तोबगे इत्यनेन सह सम्मिलिताः भविष्यन्ति । मंत्रालयः प्रोदीरितवान् यत्, भारत-भूटानयोः मध्ये विश्वास, सद्भावना परस्पर-सामञ्जस्याधारिता सहयोगमैत्र्योः अनुकरणीय-संबंधाः सन्ति । भूटानस्य प्रधान-मंत्रिणः यात्रा द्वयोः परस्परप्रगतेः समीक्षां कर्तुं भारत-भूटानयोः मध्ये सहयोगस्य स्थायिसंबंधानां विस्तारं कर्तुं च चर्चायै अवसरं प्रदास्यति ।

1&B ओटीटी प्लेटफॉर्म::

सूचना-प्रसारण-मंत्रालयेन अश्लील-सामग्र्याः प्रसारं विरुध्य अष्टादश- ओटीटी-प्रसार-प्रणाल्यः निषेधिताः। एतेषु ड्रीम्स-फिल्म्स्, हंटर्स्, हॉट शॉट्स वीआईपी, प्राइम-प्ले ,अनकट-अड्डा चेत्यादयः प्रसारप्रणाल्यः सम्मिलिताः सन्ति । एतैः सम्पृक्तानि नवदश अन्तर्जालपटलानि , दश तन्त्रांशाः , सप्तपञ्चाशत्-सार्वजनिकसंदेशपटलानि च भारते सार्वजनिक-सौविध्याय अप्राप्यानि कृतानि सन्ति। अयं निर्णयः अन्य-मंत्रालयानां महिला-बालाधिकार-विशेषज्ञानां च परामर्शेन सूचना-प्रौद्योगिकी-अधिनियमः, 2000 इत्यस्य प्रावधानान्तर्गतं स्वीकृतः अस्ति । मंत्रालयः प्रोक्तवान् यत्, सूचना -प्रसारण-मंत्री अनुराग-सिंह-ठाकुरः रचनात्मक-अभिव्यक्तेरन्तर्गतम् अश्लीलतायाः दुर्व्यवहारस्य च प्रचारं न कर्तुं प्रसार-माध्यमानां दायित्वं यथासमयं सबलं प्रतिपादितवान् ।

एकं राष्ट्रं-एकं निर्वाचनम्

एकोच्च-स्तरीय-समित्या अद्य नवदिल्ल्यां द्रौपदी-मुर्मू-वर्यायै एकं राष्ट्रं-एकं निर्वाचनम् इत्यस्मिन् विषये स्वकीयं सूचनाप्रपत्रम् सम्प्रदत्तम् । पूर्वराष्ट्रपतिनः राम-नाथ-कोविन्दस्य आध्यक्ष्ये प्रतिष्ठापितया उच्चस्तरीय-समित्या स्वकीयं सूचनाप्रपत्रं द्रौपदी-मुर्मूवर्यायै प्रदत्तम् । एतत् सूचनाप्रपत्रं केंद्रीय-गृह-मंत्रिणः अमितशाहस्य, विधि-न्याय-मंत्रिणः अर्जुन राम-मेघवालस्य,

पञ्चदशतमस्य वित्त-आयोगस्य पूर्वाध्यक्षस्य एनके-सिंहस्य , अन्येषां च उपस्थितौ प्रस्तुतं कृतम्। विधि-न्याय-मंत्रालयस्य अनुसारेण, एकं राष्ट्रं एकं निर्वाचनम् आकांक्षि-भारतस्य मूलम् अस्ति। षड्विंशत्यधिक-षट्-शताधिक-अष्टादश-सहस्र-पृष्ठानां सूचनाप्रपत्रं हितधारकैः, विशेषज्ञैः च सह व्यापक-विमर्शस्य एकनवत्युत्तरैकशतं दिवसानां च शोध-परिणामः अस्ति ।

अमित शाह-सीएए::

केन्द्रीयगृहमन्त्री अमितशाहः नगरिकता-संशोधन-अधिनियमं पुनरुच्चारितवान् प्रोक्तवान् च यत् (सीएए) इति नगरिकता-संशोधन-अधिनियमः नागरिकतायाः अधिकारं यच्छति अनेन कस्यापि नागरिकता नाधिग्रहीष्यते । एकस्मिन् समाचारपटले प्रदत्ते साक्षात्कारे श्री-शाहः प्रोक्तवान् यत्, नगरिकता-संशोधन-अधिनियमः अफगानिस्तान, बांग्लादेश ,पाकिस्तान-देशेभ्यः समागतेभ्यः हिंदू-बौद्ध-जैन-सिख-ईसाई-पारसी-शरणार्थिभ्यः अधिकारं नागरिकतां च प्रदास्यति । सः प्रोक्तवान् यत् नगरिकता-संशोधन-अधिनियमान्तर्गतं सर्वेभ्यः समानाधिकाराः प्रदास्यन्ते यतोऽहि ते अद्य भारतीयनागरिकाः भविष्यन्ति ।सः पुनः प्रोक्तवान् यत् ते देशस्य अन्यनागरिकैः सदृशं नागरिकता-सूच्यां योजयिष्यन्ते सहैव ते निर्वाचने अपि भागं भजितुं , सांसदाः, विधायकाः, मुख्यमंत्रिणः , मंत्रिणः च भवितुं शक्ष्यन्ति । सः स्पष्टीकृतवान् यत् राष्ट्रीय-नागरिक-रजिस्टर, एनआरसी इत्यस्य नगरिकता-संशोधन-अधिनियमेन सह कोऽपि सम्बन्धः न अस्ति ।

पीएम - सिख नव वर्ष::

प्रधानमंत्री नरेंद्रमोदी अद्य सिक्खधर्मावलम्बिनः नव-वर्षस्यावसरे हार्दिक-शुभकामनाः प्रदत्तवान्। एकस्मिन् सार्वजनिक-संदेश-पटले , श्री-मोदिना आशा प्रकटिता यत् वाहेगुरु इत्यस्य अप्रतिम-कृपया सर्वे प्राणिनः कल्याणं प्रचुरतां च अधिगमिष्यन्ति । प्रधानमंत्री प्रोक्तवान् यत्, गुरु-साहिब इत्येतेषां ज्ञानं समाजं स्वकीयोज्ज्वल-मार्गदर्शनेन निरन्तरम् आलोकितं कुर्यात् ।

आरएस-सुधा मूर्तिः::

सुधा-मूर्ति इत्येषा अद्य राज्यसभायाः सदस्यरूपेण शपथवचनं स्वीकृतवती । राज्यसभायाः सभापतिः जगदीप-धनखड़ः संसद-भवने नवनिर्वाचितायै सदस्यायै सुधा-मूर्ति इत्यस्यै शपथवचनं ग्राहितवान् । अस्मिन्नवसरे इंफोसिस् इत्यस्य संस्थापकः नारायण-मूर्तिः, राज्यसभायाः नेता पीयूष-गोयलः चापि सम्मिलितौ आस्ताम् । राष्ट्रपतिना द्रौपदी-मुर्मू-वर्यया प्रसिद्ध-शिक्षिका, लेखिका सुधा-मूर्ति राज्यसभायै नामाङ्किता ।

सीतारमन-गुवाहाटी::

केन्द्रीयवित्त-मन्त्री निर्मला-सीतारमणः अद्य IIT-गुवाहाटी इत्यत्र प्रोक्तवती यत् पूर्वोत्तर-राज्येषु प्रधानमन्त्रिणा नरेन्द्रमोदिना चिरकालात् ध्यानं प्रदास्यते, विगत-दशवर्षेषु अस्मिन् क्षेत्रे बहूनि उल्लेखनीय-कार्याणि घटितानि जातानि। प्रधानमन्त्रिणा पूर्वोत्तरराज्यानां विकासाय प्राथमिकता प्रदत्ता तथा च विगत-दशवर्षेषु केन्द्रीयमन्त्रिपरिषद् पञ्चाशदुत्तर-अष्टशतं वारं अस्य क्षेत्रस्य भ्रमणं कृतवत् , इति केन्द्रीयवित्तमन्त्री आईआईटी गुवाहाटी इत्यत्र स्वकीये मुख्यभाषणे अवदत् । सीतारमण-वर्या प्रोक्तवती यत् पूर्वोत्तरे विकासस्य सम्भावना वर्तते, अत्रत्याः युवानः उत्साहिनः, ऊर्जावन्तः च सन्ति। केन्द्रीयमन्त्री उक्तवान् यत् , प्रधानमन्त्री पूर्वोत्तरराज्याणि भारतस्य विकासाभिलाषस्य चालकयन्त्ररूपेण मन्यते तथा च केन्द्रसर्वकारः सुनिश्चितं करोति यत् केन्द्रस्य प्रत्येकोपक्रमेण अयं क्षेत्रः लाभान्वितः स्यात् ।

इंग्लैंड ओपन बैडमिंटन::

ऑल-इंग्लैंड-ओपन-बैडमिंटन-प्रतिस्पर्धायाः महिला-एकल-प्रागुपान्त्यचक्रे भारतीय-बैडमिण्टन-क्रीडिका पीवी-सिंधु अद्य बर्मिंघमस्य यूटिलिटा-एरेना इत्यत्र महिला-एकलप्रतिस्पर्धायां दक्षिण-कोरियायाः एन-से-यंग इत्यनया पराजिता जाता ।

।। इति वार्ता: ।।